Roll No. ..................................................
Signature of Invigilator ..........................

**Paper Code**
**BC-103**

# पतंजलि विश्वविद्यालय

## University of Patanjali
## Examination March-2021

**एक वर्षीय सहायक पाठ्यक्रम, सेमेस्टर : प्रथमम्**

**संस्कृत, तृतीयपत्रम्**

**संस्कृतसाहित्यम्**

समयः - होरात्रयम् पूर्णाङ्काः ७०

निर्देशः अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति, अङ्कनिर्देशः प्रतिखण्डं द्रष्टव्यः, सर्वे प्रश्नाः समाधेयाः।

( खण्ड -क )

( दीर्घोत्तरीयाः प्रश्नाः )

**'क' इति खण्डे पञ्च दीर्घोत्तरीयाः प्रश्नाः दत्ताः, प्रतिप्रश्नं पञ्चदश अंकाः निर्धारिताः। केचन त्रय एव प्रश्नाः समाधेयाः।** **( 3 x15 =42 )**

1. अधोलिखितस्य गद्यस्य हिन्दिभाषायामनुवादं कुरुत।

"अहो पावनी भगवती भागीरथी। पुण्यं गङ्गायाः दर्शनं नामस्मरणमपि। किं पुनः अस्याः निर्मले जले स्नानम्। हिमालयाद् गङ्गानदी प्रभवति। तदुद्गमस्थानमाच्छादितं सर्वतः हिमेन। प्रथमं पश्चिमां दिशां प्रति सा किञ्चिद् अनन्तरं वहति। तत्र तस्याः प्रवाहः अल्प विद्यते। अनन्तरं दक्षिणां दिशमुद्दिश्य सा महता वेगेनावतरति हिमालयात्। तत्र शुभ्रेभ्यः प्रस्तरेभ्यः तस्याः जलौघः पतति अधः शुभ्रेषु प्रस्तरेषु। एतादृशाः बह्वः प्रपाताः तत्र दृश्यन्त। बहुरमणीयाः ते क्षिपन्ति जलस्य तुषारानितस्ततः कुर्वन्ति च महान्तं खम्।"

2. अधोलिखितानां धातूनां पञ्चसु लकारेषु (लट्, लोट्, लङ्, विधिलिङ्, लट) रूपाणि लिखत।

(क) इष् (ख) भ्रम् (ग) आस्।

3. "महर्षिदयानन्दस्य त्रैतवादसिद्धान्तः" इति विषयमधिकृत्य निबन्धो लेख्यः।

4. अधोलिखितानां शब्दानां सर्वासु विभक्तिषु रूपाणि लिखत।

(क) नदी (ख) अस्मद् (ग) वारि।

5. वैराग्यशतकात् तृष्णाविषयकं श्लोकद्वयं विलिख्य तयोः व्याख्या कार्या?

## ( खण्ड -ख )

( लघुत्तरीयाः प्रश्नाः )

**'ख' इति खण्डे सप्त लघुत्तरीयाः प्रश्नाः दत्ताः, प्रतिप्रश्नं पञ्च अंकाः निर्धारिताः।**
**केचन पञ्च प्रश्नाः समाधेयाः।** ( 5 x5 =25 )

1. निम्नलिखितयोः श्लोकयोः सम्पूर्तिः विधेया -

   **(क)** भोगे रोगभयं कुले ..................................।।
   **(ख)** गङ्गातीरे हिमगिरि ..................................।।

2. निम्नलिखितस्य श्लोकस्य व्याख्यां कुरुत।

   शशिना च निशा निशया च शशी
   शशिना निशया च विभाति नभः।
   पयसा कमलं कमलेन पयः
   पयसा कमलेन विभाति सरः।।

3. अधोलिखितस्य श्लोकस्य पदच्छेदविभक्तिसमासाः बोधनीयाः।

   सुरतटिनी तरुमूल निवासः
   शय्या भूतलमजिनं वासः।
   सर्वपरिग्रह भोगत्यागः
   कस्य सुखं न करोति विरागः।।

4. निम्नलिखितयोः श्लोकयोः पूर्तिः कर्त्तव्या?

   **(क)** यावज्जीवो निवसाति ................................।।
   **(ख)** अङ्गं गलितं ..................................................।।

5. अधोलिखितस्य श्लोकस्य व्याख्यां कुरुत।

   वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या,
   सम इव परितोषो निर्विशेषो विशेष।
   स तु भवित दरिद्रो यस्य तृष्णा विशाला,
   मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः।।

6. श्लोकयोः व्याख्यानं कुरुत।

   **(क)** कुरुते गङ्गासागरगमनं व्रतपरिपालनमथवा दानम्।
   ज्ञानविहीनः स पुनरनेन व्रजति न मुक्तिं जन्मशतेन।।
   **(ख)** सुखतः क्रियते रामाभोगः, पश्चाद्धन्त शरीरे रोगः।
   यद्यपि लोके मरणं शरणं, तदपि न मुञ्चति पापाचरणम्।।

7. निम्नलिखितानां वाक्यानां संस्कृतभाषायामनुवादो विधेयः।

   **(क)** सत्य बोलने में तत्पर होओ।
   **(ख)** देव राम से अधिक चतुर है।
   **(ग)** इस लता से यह पुष्पा गिरा।
   **(घ)** वन में शेर, बाघ, भेड़िया, खरगोश और बन्दर रहते हैं।
   **(ङ)** सदा सत्य बोलो, धर्म करो, यत्न करो, सुखी हो और सर्वध यश पाओ।

--------------x--------------